
# 7 लीनायाः परिवारः

## लीनायाः परिवारस्य पारस्परिकं मेलनम्


लीना एकस्मिन् ग्रामे स्वपरिवारेण सह निवसति । तस्याः परिवारे पितामहः, पितामही, माता,पिता, भ्राता शंबोरः च सन्ति । तस्याः गृहस्य समीपे एव तस्याः पितृव्यः, पितृव्या, भ्रातरः भगिन्यः च  निवसन्ति ।



© NCERT not to be republished

लीना उत्पीठिकायां स्थिता अस्ति। सा उन्नता भवितुम् इच्छति। परिवारस्य उन्नततमं सदस्यं ज्ञात्वा तस्य उपरि वर्तुलं कुर्वन्तु।

## लीनायाः परिवारः सर्वान् परिवारजनान् मेलनार्थं आमन्त्रितवान् ।





### वार्तालापं करवाम

क. लीनायाः परिवारे कति सदस्याः सन्ति ?

ख. परिवारस्य उन्नततमं सदस्यं चिह्नितं कुर्वन्तु।

ग. कनिष्ठतमस्य परिवारस्य सदस्यस्य उपरि शिरोवस्त्रं चित्रयन्तु।

घ. कः लीनायाः मातुः अपेक्षया उन्नतः, परं लीनायाः पितुः अपेक्षया लघुः अस्ति।

ङ. भवतः परिवारस्य उन्नततमः लघुतमः च सदस्यः कः अस्ति ?

च. भवतः कक्षायां उन्नततमः बालकः कः अस्ति ?

छ. भवतः/भवत्याः कक्षायां कति बालकाः भवतः/भवत्याः अपेक्षया उन्नताः सन्ति?




लीना पर्वतीयक्षेत्रे कुटीररूपे गृहे निवसति। किं भवन्तः चित्रे तस्याः गृहं ज्ञातुं शक्नुवन्ति वा? उचितानां विकल्पानाम् उपरि वर्तुलं कुर्वन्तु।

क. तस्याः गृहं आपणस्य **समीपे/ आपणात् दूरम्** अस्ति तथा च विद्यालयस्य **समीपे/ विद्यालयात् दूरम्** अस्ति।

ख. विद्यालयः आपणस्य **समीपे/आपणात् दूरम्** अस्ति तथा च रक्तवर्णच्छदेः गृहस्य **समीपे/गृहात् दूरम्** अस्ति।

ग. बालकः विद्यालय-यानस्य **समीपे/ विद्यालय-यानात् दूरम्** विद्यालयस्य च **समीपे/ विद्यालयात् दूरम्** अस्ति।

## आश्चर्यजनकानि तथ्यानि

एषा सरदार-वल्लभभाई-पटेलस्य प्रतिमा
'एकतायाः प्रतिमा' इति अपि उच्यते ।
विश्वस्य उच्चतमा प्रतिमा इयं भारतस्य
गुजरातराज्ये वर्तते।





© NCERT not to be republished




## एहि करवाम

क. यत् उन्नततमम् अस्ति तं ✓ चिह्नितं कुर्वन्तु।

i.




ii.



ख. यत् लघुतमम् तत् ✓ चिह्नितं कुर्वन्तु।

i.



ii.




ग. यत् स्थूलतमम् अस्ति तत् ✓ चिह्नितं कुर्वन्तु।

i.



ii.




घ. यत् कृशतमम् अस्ति तत् ✓ चिह्नितं कुर्वन्तु।

i.



ii.



© NCERT not to be republished

## विचिन्त्य करवाम

अस्मात् दीर्घां यष्टिकां वंशदण्डं वा चित्रयन्तु।—






अस्मात् लघु-पाशं चित्रयन्तु।—



पितामही चित्रायाः स्वेदकस्य दीर्घतां हस्तमापेन निरीक्षयति ।




चित्रा अपि स्वहस्तमापेन यष्ट्याः, उत्पीठिकायाः अङ्कन्याः पुस्तिकायाः च दीर्घतां ज्ञातुम् इच्छति।

© NCERT not to be republished



## विचिन्त्य उत्तरं वदन्तु

क. मम उत्पीठिका __________ हस्तमापयुता अस्ति।

ख. मम स्यूतः __________ हस्तमापयुतः अस्ति

ग. मम कक्षायाः कृष्णफलकं __________ हस्तमापयुतम् अस्ति

घ. मम गणितस्य पुस्तकं __________ हस्तमापयुतम् अस्ति

ङ. मम बाहुः __________ हस्तमापयुतः अस्ति।

च. मम मित्रस्य बाहुः __________ हस्तमापयुतः अस्ति।

किं चित्रा एतेषां सर्वेषां वस्तूनां दीर्घतां ज्ञातुं हस्तमापं प्रयोक्तुं शक्नोति ? भवतः परितः यानि वस्तूनि हस्तमापात् लघुतराणि सन्ति तेषाम् उपरि वर्तुलं कुर्वन्तु। किं वयम् एतेषां वस्तूनां दीर्घतां ज्ञातुम् अङ्गुलीनाम् उपयोगम् अपि कर्तुं शक्नुमः?








© NCERT not to be republished



## एहि करवाम

एतेषां वस्तूनां दीर्घतां ज्ञातुं भवन्तः किं च इष्यन्ति हस्तमापं वा अङ्गुलीमापं वा? तत् किमर्थम्? समुचितस्य विकल्पस्य उपरि वर्तुलं कुर्वन्तु। एतेषां वस्तूनां दीर्घतां अनुमातुं प्रयत्नं कुर्वन्तु।

| वस्तूनां नामानि | यत् प्रयोक्ष्यन्ति तत् वर्तुलं कुर्वन्तु? | मम अनुमानम् | मम निष्कर्षः |
|---|---|---|---|
| जलकूपी  |  हस्तमापः अङ्गुलीमापः वा | | |
| चमसः  |  हस्तमापः अङ्गुलीमापः वा | | |
| अङ्कनी  |  हस्तमापः अङ्गुलीमापः वा | | |
| मम मित्रस्य नासिका  |  हस्तमापः अङ्गुलीमापः वा | | |
| पादः  |  हस्तमापः अङ्गुलीमापः वा | | |
| कुञ्चिका  |  हस्तमापः अङ्गुलीमापः वा | | |

© NCERT not to be republished

| चरणमापेन परिमाणं | चरणमाप-विषये मम अनुमानम् | चरणमाप-विषये मम निष्कर्षाः |
|---|---|---|
| मम आसनस्य कक्षायाः द्वारस्य च मध्ये दूरम् | | |
| कक्षायाः एकः भागः | | |
| शय्यायाः शौचालयस्य च मध्ये दूरम् | | |
| भवतः कक्षस्य भित्तिद्वयस्य मध्ये दूरम् | | |






## एहि करवाम


क. गुरुतरं वस्तु ✓ चिह्नितं कुर्वन्तु।

i.





ii.





ख. लघुतरं वस्तु ✓ चिह्नितं कुर्वन्तु।

i.








ii.








© NCERT not to be republished

ग. गुरुतरं वस्तु रज्यतु।


i.




ii.



iii.




iv.



घ. लघुतरं वस्तु रज्यतु।

i.




ii.



iii.



iv.



## वार्तालापं करवाम

क. भवतः, भवतः मित्रस्य च मध्ये कः गुरुतरः अस्ति इति भवान् कथं ज्ञास्यति? कक्षायां चर्चां करोतु ।

ख. स्वस्य भारं जानन्तु । भवतां भारः प्रायः कुत्र कथं च माप्यते इति किं भवन्तः वक्तुं शक्नुवन्ति?

© NCERT not to be republished



## एहि करवाम



**क. द्रोणीं जलेन पूरयन्तु।**

i जलपूरिताः ________ कलशाः द्रोणीं पूरयिष्यन्ति।

ii. जलपूरिताः ________ चषकाः द्रोणीं पूरयिष्यन्ति |

iii. जलपूरिताः ________ कटोराः द्रोणीं पूरयिष्यन्ति।

**ख. निम्नलिखितान् प्रश्नान् उत्तरन्तु -**


i. जलपूरिताः कति लघुचषकाः भवतः जलकूपीं पूरयिष्यन्ति ?________

ii. अधुना स्वमित्रस्य जलकूपीं तेनैव लघुचषकेण पूरयतु। कति जलपूरिताः लघुचषकाः भवतः मित्रस्य जलकूपीं पूरयिष्यन्ति ?_______

iii. कस्यां जलकूप्याम् अधिकं जलं पूरितम् ? _______

iv. अन्यया जलकूप्या प्रयत्नं करोतु। कस्यां जलकूप्यां न्यूनं जलं पूरितम्?

**ग. अधिकं जलयुतं जलपात्रं वर्तुलं कुर्वन्तु।**



© NCERT not to be republished


## घ. जलम् अस्माकं कृते बहूपयोगि अस्ति।

प्रदत्तक्रियाणां कृते आवश्यकस्य जलस्य समुचितं परिमाणं ✓ चिह्नितं कुर्वन्तु।

i.



दन्तधावनार्थं



जलपूर्णा द्रोणी ☐



जलपूर्णं लघुपात्रम् ☐


ii.



स्नानार्थम्



जलपूर्णा द्रोणी ☐



एकं जलकुण्डम् ☐


iii.



2 चषकमित-निम्बूजलस्य निर्माणार्थम्



जलपूर्णः कलशः ☐



जलपूर्णा द्रोणी ☐


iv.



पादपस्य सिञ्चनार्थम्



जलस्य लघुपात्रम् ☐



जलपूर्णा द्रोणी ☐

© NCERT not to be republished



## परियोजना-कार्यम्

क. जलधारास्नानस्य नलिकाजलस्नानस्य च अपेक्षया द्रोण्यां जलं संगृह्य स्नानकरणं किमर्थम् अपेक्षितम्? इति चर्चां कुर्वन्तु।

ख. वर्णयुताः कर्गदपट्टिकाः तथा विदीर्य संश्लेषयन्तु यथा तत्र एकः भागः लघु अपरश्च दीर्घः भवेत्। एताः पट्टिकाः विभिन्नपरिमाणे भवेयुः।

| **लघुतरम्**<br>एते लघुतराः सन्ति। | **दीर्घतरम्**<br>एते दीर्घतराः सन्ति। |
|---|---|
| | |

ग. यानि वस्तूनि वहने सुकराणि यानि च वहने दुष्कराणि तानि वस्तूनि सूचीबद्धानि कुर्वन्तु।

| **वहने सुकराणि** | **वहने दुष्कराणि** |
|---|---|
| | |
| | |
| | |

घ. विभिन्नपरिमाणस्य जलकूप्यः, पात्राणि, चषकाः च स्वीकुर्वन्तु। अधुना पश्यन्तु यत् कति चषकमितं पात्रमितं वा जलं जलकूपीं पूरयितुं शक्नोति। एतेषु त्रिषु वस्तुषु कतमं वस्तु अधिकं जलं धारयितुं शक्नोति?

बालकान् पृच्छन्तु यत् ते एकस्मिन् दिने कति चषकमितं जलं पिबन्ति। तान् परितः जलस्य अपव्ययः कथं जायमानः अस्ति इति विषये चर्चां कुर्वन्तु, तेषु संवेदनशीलतां च जागरयन्तु, यदि चषके जलं अवशिष्टं भवति तर्हि ते किं करिष्यन्ति? किं तत् जलं क्षेपणीयम् अथवा वनस्पतिभ्यः देयम्? । अप्रयोगे सति नलिकायाः पिधानं, जलस्य पुनः उपयोगः इत्यादीनां जल-संरक्षण-उपायानां विषये अपि चर्चां कुर्वन्तु।



© NCERT not to be republished